महाभारते । १३ । १४५ । ५८ ।
"अपरे खल्वविज्ञाना धर्म्मविद्वेषिणो नराः ।
ब्राह्मणान् वेदविदुषो नेच्छन्ति परिसर्पितुम् ।")
विध, श विधाने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) विधिर्विधानम् । श, विधति वेधा जगत् । अनेकार्थत्वात् छिद्रकरणेऽप्ययम् । विधितश्छिद्रितौ विद्धे । इत्यमरः ॥ कर्णवेधः । इति दुर्गादासः ॥

विधः, पुं, (विध्यते क्रियते इति । विध + घञर्थे कः ।) विधानम् । हस्त्यन्नम् । प्रकारः । वेधनम् । ऋद्धिः । इति भरतधृतरभसाजयौ ॥

विधवनं, क्ली, कम्पनम् । विपूर्व्वधूधातोर्भावे अनट् (ल्युट्)प्रत्ययेन निष्पन्नम् ॥

विधवा, स्त्री, (विगतो धवो भर्त्ता यस्याः ।) मृतभर्त्तृका । तत्पर्य्यायः । विश्वस्ता २ । इत्यमरः ॥ जालिका ३ रण्डा ४ यतिनी ५ यतिः ६ । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे ।१०।४०।२।
"को वां शयुत्रा विधवेव देवरं
मर्य्यं न योषा कृणुते सधस्थ आ ॥")
तस्याः कर्त्तव्याकर्त्तव्यानि यथा । विष्णुः ।
"मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा इति ।"
ब्रह्मचर्य्यं मैथुनवर्ज्जनं ताम्बूलादिवर्ज्जनञ्च ।
यथा, प्रचेताः ।
"ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्ज्जयेत् ॥"
अभ्यञ्जनं आयुर्व्वेदोक्तं पारिभाषिकम् । स्मृतिः ।
"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन ।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ॥"
एतत्तु तर्पणं पुत्त्रपौत्त्राद्यभाव इति मदनपारिजातः ॥
"वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥"
इति शुद्धितत्त्वम् ॥*॥
अपि च ।
"ब्राह्मणी पतिहीना या भवेन्निष्कामिनी सदा ।
एकभक्ता दिनान्ते सा हविष्यान्नरता सदा ॥
न धत्ते दिव्यवस्त्रञ्च गन्धद्रव्यं सुतैलकम् ।
स्रजञ्च चन्दनञ्चैव शङ्खसिन्दूरभूषणम् ॥
त्यक्त्वा मलिनवस्त्रा स्यान्नित्यं नारायणं स्मरेत् ।
नारायणस्य सेवाञ्च कुरुते नित्यमेव च ॥
तन्नामोच्चारणं शश्वत् कुरुतेऽनन्यभक्तितः ।
पुत्त्रतुल्यञ्च पुरुषं सदा पश्यति धर्म्मतः ॥
मिष्टान्नं न च भुङ्क्ते सा न कुर्य्याद्विभवं व्रजम् ।
एकादश्यां न भोक्तव्यं कृष्णजन्माष्टमीदिने ॥
श्रीरामस्य नवम्याञ्च शिवरात्रौ पवित्रया ।
अघोरायाञ्च प्रेतायां चन्द्रसूर्य्योपरागयोः ॥
भ्रष्टद्रव्यं परित्याज्यं भुज्यते परमेव च ।
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
सन्यासिनाञ्च गोमांसं सुरातुल्यं श्रुतौ श्रुतम् ॥
रक्तशाकं मसूरञ्च जम्बीरं पर्णमेव च ।
अलाबुर्व्वर्त्तुलाकारा वर्ज्जनीया च तेरपि ॥
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम् ।
यान आरोहणं कृत्वा विधवा नरकं व्रजेत् ॥
न कुर्य्यात् केशसंस्कारं गात्रसंस्कारमेव च ।
केशवेशीजटारूपा सुचीरं तीर्थकं विना ॥
तैलाभ्यङ्गं न कुर्व्वीत न हि पश्यति दर्पणम् ।
मुखञ्च परपुंसाञ्च यात्रां नृत्यं महोत्सवम् ॥
नर्त्तकं गायनञ्चैव सुवेशं पुरुषं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥
(विधवायास्तु पत्यन्तर-ग्रहणं - निषिद्धं न तद्विवाहशब्दवाच्यञ्च । तत्र विशेषतो विचारेण ग्रन्थविस्तृतिर्भवेदतस्तद्भीतः केवलं कतिपयानि वचनान्युद्धृत्य दर्शयामि तानि सुधीभिर्व्विचारणीयानीति ॥ तत्र याज्ञवल्क्यः ।
"अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्व्विकां कान्तामसपिण्डां यवीयसीम् ॥"
अनन्यपूर्व्विकां दानेनोपभोगेन वा पुरुषान्तरापरिगृहीताम् ॥ व्यासः । २ । ३ ।
"सवर्णामसमानार्षाममातृपितृगोत्रजाम् ।
अनन्यपूर्व्विकां लघ्वीं शुभलक्षणसंयुताम् ॥"
गौतमः । ४ । १ ।
"गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्व्विकाम् ॥"
वशिष्ठः । ८ । १ ।
"गृहस्थो विनीतक्रोधहर्षो गुरुणानुज्ञातः स्नात्वा असमानार्षां अस्पृष्टमैथुनां भार्य्यां विन्देत ॥" हारीतः । ४ । १ ।
"असमानार्षगोत्रां हि कन्यां सभ्रातृकां शुभाम् ।
सर्व्वावयवसम्पन्नां सुवृत्तामुद्वहेन्नरः ॥"
पारस्करगृह्यसूत्रम् ।
"अग्निमुपधाय कुमार्य्याः पाणिं गृह्णीयात् त्रिषु त्रिषूत्तरादिषु ॥"
कन्याशब्दार्थः कथ्यते । "कन्या कुमारी" इत्यमरः । "कन्यापदस्यादत्तस्त्रीमात्रवचनेन ।" इत्यादि दायभागटीकायां आचार्य्यचूडामणिः । "कन्यापदस्यापरिणीतामात्रवचनात् ।" इति रघुनन्दनः ॥ "अनूढात्वेन कन्यापदस्य सपत्नीकन्या बोधकतया असुख्यत्वप्रसक्तेः तद्रूपेणैव कन्यापदस्य शक्तिः ।" इति श्रीकृष्णतर्कालङ्कारः ॥ पूर्व्वोक्तैर्व्वचनैः कुमारीणामेव परिणये विवाहशब्दवाच्यत्वं नतूढानाम् ॥
मनुः । ५ । १५१—१५२ ।
"यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः ।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत् ॥
मङ्गलार्थं स्वस्त्ययनं यज्ञस्तासां प्रजापतेः ।
प्रयुज्यते विवाहेषु प्रदानं स्वाम्यकारणम् ॥"
तत्रैव । १६०—१६३ ।
"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता ।
स्वर्गं गच्छत्यपुत्त्रापि यथा ते ब्रह्मचारिणः ।
अपत्यलोभात् या तु स्त्री भर्त्तारमतिवर्त्तते ।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥
नान्योत्पन्ना प्रजास्तीह न चाप्यन्यस्य परिग्रहे ।
न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते ॥
पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
लघुहारीतः ।
"स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे ।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥"
मनुः । ९ । ४७ ।
"सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाहुर्द्ददानीति त्रीण्येतानि सतां सकृत् ॥"
तत्रैव । ५९—६५ ।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥
विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि ।
एकमुत्पादयेत् पुत्त्रं न द्वितीयं कथञ्चन ।
द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः ॥
अनिर्वृत्तं नियोगार्थं पश्यन्तो धर्म्मतस्तयोः ॥
विधवायां नियोगार्थे निर्व्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥
नियुक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः ।
तावुभौ पतितौ स्यातां स्नुषाग-गुरुतल्पगौ ॥
नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः ।
अन्यस्मिन् हि नियुञ्जाना धर्म्मं हन्युः सनातनम् ॥
नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्त्यते क्वचित् ।
न विवाहविधावुक्तं विधवावेदनं क्वचित् ॥"
"न च विवाहविधायकशास्त्रे अन्येन पुरुषेण सह पुनर्व्विवाह उक्तः ॥" इति कुल्लूकः ॥
तत्रैव । ६८—७० ।
"ततः प्रभृति यो मोहात् प्रमीतपतिकां स्त्रियम् ।
नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥
यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात् सकृत् सकृदृतावृतौ ॥"
"आगर्भग्रहणात् सकृद्गमनोपदेशाच्च यस्मै वाग्दत्ता तस्यैवापत्यं भवति ।" इति कुल्लूकभट्टः ॥ तत्रैव । ७१ ।
"न दत्त्वा कस्यचित् कन्यां पुनर्द्दद्याद्विचक्षणः ।
दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम् ॥"
तत्रैव । ७९ ।
"उन्मत्तं पतितं क्लीवमबीजं पापरोगिणम् ।
न त्यागोऽस्ति द्विषन्त्याश्च नच दायापवर्त्तनम् ॥"
तत्रैव । ९७ ।
"कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥"
आश्वलायनगृह्यसूत्रम् । ४ । २ । २१ ।
तामुत्थापयेत् देवरः पतिस्थानीयः अन्तेवासी जरद्दासः । उदीर्ष्व नार्य्यभि जीवलोकम् ॥
अथ पत्नीमुत्थापयेत् कः देवरः पतिस्थानीयः स पतिस्थानीय इत्युच्यते । अनेन ज्ञायते पतिकर्त्तृकं कर्म्म पुंसवनादि पत्यसम्भवे देवरः